International Journal of Sanskrit Research 2017; 3(4): 259-261

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 259-261
© 2017
www.anantaajournal.com
Received: 05-05-2017
Accepted: 06-06-2017

**Dr. AR Vijayasree**
Lecturer in Sanskrit, D.N.R. College, Bhimavaram, Andhra Pradesh, India

**Correspondence**
**Dr. AR Vijayasree**
Lecturer in Sanskrit, D.N.R. College, Bhimavaram, Andhra Pradesh, India

# विद्याधनं सर्वधनप्रधानम्

**Dr. AR Vijayasree**

प्रस्तावना

न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् 1 ।। इत्युक्तिर्विद्यते।

एतत्सदृशोऽन्यश्श्लोकोऽपि विद्यते –

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।

सरस्वत्यास्सकाशे अपूर्वं विलक्षणञ्च धनमस्ति। तदेव विद्याधनम्। प्रायशः व्यये कृते धनं क्षीयते। सञ्चयात् वृद्धिं प्राप्नोति। परन्तु विद्याधनं व्ययेकृते वृद्धिं प्राप्नोति। सञ्चयात् क्षीयत इत्यस्य श्लोकस्य भावः।

अस्मत्संस्कृतौ कीर्तिमतां यशोधना इति, तपोवतां तपोधना इति, मानवतां मानधना इति, गोसम्पन्नानां गोधना इति, त्यागसम्पन्नानां त्यागधना इति व्यवहारोऽस्ति। एतेभ्यस्सर्वेभ्योऽपि विद्याधनवतामेव प्राधान्यं वर्तत इति विद्याधनं सर्वधनप्रधानमिति सूक्तिः विराजते। एतद्धनं चोरैः हर्तुं न योग्यं, राजभिरपि स्वायत्तीकर्तुं न योग्यं भवति। भ्रातृभिः न विभज्यं भवति। अत्युत्तमविद्यासम्पन्नोऽपि भारभूतो न भवति। विद्यादाने कृते विद्या वृद्धिं प्राप्नोत्येव न तु क्षीयते। अत उक्तम् –

अन्नदानं महादानं विद्यादानमतःपरम् ।
अन्नेन क्षणिका तृप्तिः यावज्जीवन्तु विद्यया 2 ।।

अन्नदाने कृते क्षणिका तृप्तिरागच्छति। विद्यादाने तु यावज्जीवं तृप्तिरागच्छति इति भावः। प्रथमतः सर्वधनानां प्रस्तावः क्रियते।

**यशोधनाः –**

सोक्रटीस्, प्लाटो, सर्वेपल्लिराधाकृष्णन् इत्यादयः तत्त्ववेत्तारः स्वस्वमहोन्नतोपदेशैः शिष्यप्रशिष्याननेकान् प्रतिभासम्पन्नान् कारितवन्तः। प्लाटो सोक्रटीस् गुरोश्शिष्यः। सः स्वगुरुं महोन्नतव्यक्तित्वेन आहतवान्। परन्तु सोक्रटीस् एवं मन्यते यत् कोपि सम्पूर्णज्ञानी भवितुं नार्हतीति यतः ज्ञानमपारं, सागरमिव गम्भीरम्। विद्यायाः गाम्भीर्यं ज्ञातुं कस्याप्यसाध्यमेवेति कथयति। राधाकृष्णन् सदृशः तत्त्वज्ञानी स्वतात्विकचिन्तनैः रष्यन् अध्यक्षं स्टालिन् महाशयमपि करुणापूरितं कृतवान्। आक्स्फर्ड्, क्रेम्ब्रिङ्ज् आदि विश्वविद्यालयेषु अपि तं सगौरवम् आहूय आध्यात्मिकोपन्यासान् दातुं प्रार्थितवन्तः। आन्ध्र, बनारसविश्वविद्यालयावपि तम् उपकुलपतित्वेन नियम्य स्वप्रतिष्ठां द्विगुणीकृतं कारितवन्तौ। सः भारतदेशस्य राष्ट्रपतिर्भूत्वा अपारं यशः सम्पादितवान्। एतेषां कीर्तिः भूलोके यावत्पर्यन्तं भवति तावत्पर्यन्तं स्वर्गेऽपि भवतीति विषये नास्ति सन्देहः।

**तपोधना**

वसिष्ठविश्वामित्रादयः महर्षयः तपस्सम्पन्नाः एतौ द्वावपि ब्रह्मर्षिपदं प्राप्तवन्तौ। विश्वामित्रः स्वयं राजा सन् अतिकठोरतपसा ब्रह्मर्षिर्बभूव। वसिष्ठः इक्ष्वाकुवंशपुरोहितोऽपि राजान्तःपुरेषु सत्स्वपि आश्रमवासमेव स्वीकृत्य तपः आचरन् स्वजीवनं यापितवान्। अतः महर्षयस्सर्वे स्वतपसा अशेषपुण्यमार्जयित्वा स्वर्गलोके निवासं चक्रुः।

**मानधनाः**

अशोकचक्रवर्ती, श्रीकृष्णदेवराय, शिवाजी प्रभृतयः महाराजाः स्वपरिपालनविषये कटिबद्धाः शत्रुसैन्यं पराजित्य स्वपराक्रमेण चरित्रे सुवर्णाध्यायं सृष्टवन्तः। अत एव युद्धे मृतवतां राज्ञां वीरस्वर्गे एव प्रवेशः। तेषां नरकप्राप्तिर्न भवति। तेषां कीर्तिः यावत्पर्यन्तं धारातले विराजते तावत्पर्यन्तं स्वर्गलोकेऽपि तेषां स्थितिरिति लोकरीतिः।

**गोधनाः**

उत्तमानां पुरुषाणां तुलने गोधनं प्रख्यातम्। च्यवनमहर्षिविषये राज्यानि वा सम्पदः वा गोधनेन तुल्यं न भवन्तीति ज्ञायते। अत एव गोधनम् उत्तमधनम्। राज्ञः सकाशं स्वेन तुल्यं गोधनं स्वीकृत्य स्वेनसाकं जले स्थितानां जलचराणाम् उत्तमगतिं दत्वा च्यवनः जगत्प्रसिद्धो बभूव। [3]वसिष्ठादेशानुसारेण कामधेनोः पुत्र्याः नन्दिन्याः गोसेवां कृत्वा सुदक्षिणादेव्या सहितः दिलीपः रघुरूपेण उत्तमसन्ततिं प्राप्तवान्। जाबालेश्शिष्यः सत्यकामोऽपि गुरुमुखतः अशेषज्ञानमाप्तवान् अत्युत्तमां गतिञ्च प्राप्तवान्।

**त्यागधनाः**

बालगङ्गाधरतिलक्, महात्मागान्धी, जवाहरलालनेह्रू, सर्दारवल्लभाईपटेल् इत्यादयः स्वातन्त्र्योद्यमे स्वजीवनमर्पयित्वा स्वकीयमहत्तरोपन्यासैः जातिम् उत्तेजयित्वा विदेशीयानां निष्कासने कटिबद्धा बभूवुः। तेषां त्यागफलमेव अद्यतनमस्माभिः अनुभूयमानं स्वातन्त्र्यम्। अनेन त्यागेनैव एते सर्वेऽपि पुण्यमार्जयित्वा स्वर्गं प्राप्नुवन्तः।

पूर्वोक्तास्सर्वेऽपि स्वकीयपुण्यक्षयानन्तरं पुनः भूलोकं प्रविशन्त्येवेति कथने इयं कथा प्रमाणभूता। [4]अरण्यपर्वणि धर्मराजाय मार्कण्डेयमहर्षिः इन्द्रद्युम्नवृत्तान्तमेवं कथयति। पुरा इन्द्रद्युम्नमहाराजस्य पुण्यं क्षीणमिति मत्वा इन्द्रादयः देवताः तं भूलोके अपातयन्। तदा इन्द्रद्युम्नः स्वपूर्वजान् उलूकबककूर्मान् पृष्ट्वा स्वकीर्तिः भूलोके इतोऽप्यवशिष्टेति यदा शपयति तदा देवाः तं पुनः ऊर्ध्वं नयन्ति। क्षीणे पुण्ये मर्त्यलोकं विशन्तीति [5]भगवद्गीतायामप्युक्तम्।

परन्तु विद्याधनवतां स्थितिरन्यैव। विद्या तु गमनवत् अनन्ता, सागरवत् गम्भीरा। विद्यायाः अभिवृद्धिः युगयुगेभ्यः विकसन्ती विराजते। सम्पूर्णज्ञानी सागरतुल्यः। सागरः यथा सर्वतः आगतानि नदीजलानि स्वीकरोति तथैव ज्ञानी सर्वतः आगतं ज्ञानं स्वीकरोति। सा विद्या गुरुमुखत एव अध्येतव्या नोचेत् छात्रा मत्सरग्रस्ता भूत्वा यवक्रीतवत् भ्रष्टा भवन्ति। तत्कथां परिशीलयामः। पूर्वं रैभ्यः भरद्वाज इति द्वे मित्रे वने आस्ताम्। रैभ्यस्य द्वौ पुत्रौ अर्वावसु परावसू। भरद्वाजस्य यवक्री इति पुत्रः। सः सकलवेदशास्त्रागमपण्डितौ रैभ्यपुत्रौ दृष्ट्वा असूयाः ग्रस्तो भूत्वा सकलशास्त्रज्ञानं प्राप्तुम् इन्द्राय घोरं तपः कृतवान्। इन्द्रः प्रत्यक्षो भूत्वा वरं दास्यामि वृण्विति यदा उक्तवान् तदा स यवक्रीतः विना पठनं सकलशास्त्रज्ञानं मह्यम् आगन्तव्यमिति ते वरयामास। गुरुमुखतः ज्ञानं प्राप्तव्यं, तुष्करतपसत्वं तान् प्राप्तुं इच्छति चेत् तादृश्यः विद्याः त्वयि मात्सर्यं जनयन्ति तन्न युक्तमिति इन्द्रः कथयति। परन्तु यवक्रीतः तथैव घोरं तपः आचरन्नेवास्ते तदा इन्द्रः व्याधिपीडितवृद्धरूपेणागत्य यवक्रीतः यदा स्नानार्थं गङ्गातीरे आयाति तदा तत्रागत्य मुष्ट्या सिक्तामानीय नद्याः मध्ये पातयतिस्म। तद्दृष्ट्वा विस्मितः यवक्रीतः किमेतदिति यदा पृच्छति तदा नद्यामुपरि सेतुं बध्नामीति कथयति। तदा यवक्रीतः विहस्य असाध्यं कार्यं त्यक्त्वा अन्यत्कार्यं कुर्वीति कथयति। तदा वृद्धः एवं वदति यत् त्वं विनाध्ययनं तपसा सर्वाः विद्याः आगन्तव्या इति भावयसि किल अहमपि तथैव सेतुं बद्धुं किं न शक्नोमीत्युक्त्वा निजरूपेण इन्द्रः प्रत्यक्षोऽभूत्। तदा यवक्रीतः इन्द्रं दृष्ट्वा स्वस्य, स्वपितुरपि तपोबलेनैव वेदज्ञानम् अनुगृहात्विति प्रार्थयति। किमपि वक्तुमसमर्थः इन्द्रः तथैव तौ द्वापि विद्याः अनुगृहीत्वा अन्तर्हितो भवति।

ततः यवक्रीतः स्वपितुस्सकाशमागत्य एतत्सर्वं स्वपितरं प्रति कथयति। तदा सः हे पुत्र! कदापि विद्यागर्वं मा कुरु इति। अपि च रैभ्यं, तस्य पुत्रान् प्रति कदापि अपकारं मा कुर्वीत इति बोधयामास। तथापि एकदा यवक्रीतः रैभ्यस्याश्रमे सञ्चरन् तत्र रैभ्यस्य वधूम् एकाकिनीं परावसोः भार्यां कृष्णां दृष्ट्वा मोहाकृष्टो बभूव। तस्यास्समीपं गत्वा स्वाभिलाषां प्रकटयामास। सा ततः स्वश्वशुरं प्रत्येतत्सर्वं यदा कथयति तदा क्रोधाविष्टस्सः स्वजटाः उत्कृत्य अग्निकुण्डे पातयित्वा वधूसदृशामन्यां सुन्दराङ्गीं, विकृत दंष्ट्राकरालवदनं शूलहस्तं राक्षसं तस्मात् कुण्डात् उत्पादयामास। तदा रैभ्यस्यादेशानुसारं तौ द्वौ यवक्रीतं हन्तुमुद्युक्तौ। सा स्वविलासादिभिः तं मोहयित्वा तस्य मन्त्रपूतं सजलं कमण्डलम् अपहृतवती। यदा स कलशः न,टः तदा सोऽपरिशुद्धोऽभूत्। तदा राक्षसः तं हन्तुम् उद्युक्तो भवति। सः यत्रकुत्रापि जले प्रवेष्टुमुद्युक्तो भवति तर्हि जलमदृश्यमभूत्। अन्ततः स्वपितुरग्निहोत्रगृहं प्रविश्य तेन राक्षसेन मारितः तौ द्वावपि रैभ्यसमीपमागत्य यवक्रीतमरणवृत्तान्तं सर्वं कथितवन्तौ। सन्तुष्टः रैभ्यः राक्षसायतां सुन्दरीं भार्यात्वेन दत्तवान्। कालान्तरे अर्वावसुः स्वयज्ञकार्यं भ्रातुः परावसोः समर्पयित्वा पितृहत्याकरणात् तस्य पापविमुक्तये प्रायश्चित्तकार्यमकरोत्। तदा अग्न्यादिदेवताः सन्तुष्टा वरं वृण्विति यदा कथयन्ति तदा तेन प्रार्थिता देवाः यवक्रीतमपि पुनरुज्जीवितं कारयन्ति। तदा यवक्रीतः तान् दृष्टक वेदाध्ययनसम्पन्नोऽप्यहं तेभ्यः कथमल्पः इति पृच्छति। तदा देवाः एवं कथयन्ति यत् गुरुमुखतः विद्या अध्येतव्येति। अतः सैव विद्या विनयं ददाति। विनयात् सः सर्वेषां पूज्यार्हो भवति। पात्रत्वात् धनं प्राप्नोति। धनप्राप्त्या धर्माचरणं कर्तुं शक्तो भवति। तादृशधर्माचरणेन स्वयं रक्षितोऽपि भवति। विद्यायाः पारमार्थिकता सर्वजनसुखाकाङ्क्षा। लोके इयमुक्तिः प्रसिद्धा। सर्वे जनास्सुखिनो भवन्तु इति।

अत्रैकां कथां परिशीलयामः। एकदा गुरुः शिष्यान् प्रति एवं कथितवान् – हे शिष्याः! भवतां विद्याध्ययनं सर्वं समाप्तमतः मदुपदेशं स्वीकृत्य कार्याचरणं कुर्वीति एकं कण्टकप्राये मार्गं दर्शयित्वा इतः स्वगृहं प्रति गच्छन्त्विति आदिशति। शिष्याः तद्दृष्ट्वा कथं गन्तव्यमिति चिन्तामग्ना अभूवन्। आदावेकः यथाकथञ्चित् मार्गं तीर्णवान्। द्वितीयस्तु पादरक्षकमपि वृक्षनारं स्वीकृत्य तीर्णवान्। तृतीयस्तु एकैकं कण्टकं निर्मूल्य तन्मार्गं तीर्णवान्। तदा गुरुः तृतीयं प्रति त्वदीयविद्यैव सम्पूर्णं सार्थका अभूत्। अवशिष्टयोर्द्वयोः विद्या असम्पूर्णेति स्पष्टीकृतवान्।

विद्याविहीनः स नेत्रोऽपि नेत्रविहीन एव। ज्ञानिनैव सन्देहपरिष्कारः भवति। सा विद्या परोक्षरहस्यानपि बहिर्गतं करोति। धनधान्यपशुसम्पन्नोऽपि मानवः विद्याविहीनः भवति चेत् परिपूर्णो न भवति। विद्यावानेव सर्वजननमस्कारयोग्यतां प्राप्नोति। यत्किञ्चिद्धनं नष्टमपि अनन्तरकाले सम्पादितुं शक्नुमः। अतः सकाले विद्यार्जनं कर्तव्यम्। नैजीरियाप्रान्ते एका कथा प्राचुर्ये

वर्तते। ज्ञानं, आहारं, सम्पत् एतानि त्रीणि एकदा प्रयाणं कुर्वन्ति स्म। मार्गमध्ये आहारं सम्पदं काक्षमाणं मनुजं विनिन्ध ज्ञानाभिलाषिणं मानुजं विवेकिनमिति मत्वा तस्य समीपे आहारं, सम्पत् द्वे अपि निश्चलं स्थित्वा तेन ज्ञानेन कालं यापयामासतुः। अर्थात् ज्ञानी एव आहारं सम्पादितुं शक्नोति। सम्पदमपि रक्षितुं शक्नोति। अज्ञनी तु आहारसम्पादने, सम्पद्रक्षणे अशक्तो भवतीति अस्याः कथायाः सारः। न हि ज्ञानेन सदृशं पवित्रमिह विद्यत इति गीतायाः उक्तिः खलु।

अतः ज्ञानार्थं प्रयत्नः कर्तव्यः। भगवानेव सृष्टवान् स एवास्माकं सर्वं ददातीति प्रयत्नं न कृत्वा उपविशामः चेत् कार्यं सफलं न भवति। प्रयत्नः मानवलक्षणमेव। प्रयत्नहीने मनुजं देवोऽपि न क्षाम्यति। यदि वयं तिलनान् बहिः स्थापयाम चेत् तैलं न प्राप्नुमः खलु। विना प्रयत्नं मार्जालोऽपि क्षीरं पातुं न शक्नोति।

जीवं बन्धविमुक्तं कारयित्वा परमात्मनः सकाशं या नीयते सैवात्मविद्या अन्ततः ब्रह्मणः सकाशात् आगतमेतज्जगत् परब्रह्मणि लीयते। एतदधिकृता विद्यैवात्मविद्या। ज्ञानी जननमरणचक्रे बद्धो न भवति। अन्ततः मोक्षमेव प्राप्नोति। एकमेवाद्वितीयमिति ज्ञानं परमात्मनः विषये यथार्थमिति ज्ञायते। उदा – पञ्चभूतात्मिकतत्त्वं भावयामश्चेत् मृदः घटमागच्छति। कुलालः मृत्सहायेनैव घटं करोति। तस्य मूलभूतं वस्तु मृदेव। घटभिन्नं मृत् न भवति। मृदेव घटः, घट एव मृत्। सर्वत्र घटे मृत्त्वं व्याप्तमिति। घटे नष्टे तत् मृदि लीयत इति पृथिवीतत्त्वेन ज्ञायते।

जलतत्त्वे परिशीलयामश्चेत् सागरात् तरङ्गः उद्भवति। तरङ्गस्य जन्मस्थानं सागरमेव। सागरात् तरङ्गः भिन्नो न भवति। सागरोऽन्यः तरङ्गोऽन्य इति कथनं हास्यास्पदं भवति। तरङ्गे जलतत्त्वं सर्वत्र व्याप्तम्। अन्ततः सागरे तरङ्गः लीनो भवति।

अग्नितत्त्वं परिशीलयामश्चेत् अग्निज्वालात् स्फुलिङ्गः उद्भवति। स्फुलिङ्गे अग्नितत्त्वं सर्वत्र व्याप्तम्। अग्निर्भिन्नः स्फुलिङ्गः भिन्नः इति कथनं नोचितम्।

आकाशतत्त्वं परिशीलयामश्चेत् सूर्यः एकोऽपि अनेकेषु घटेषु भिन्नत्वेन गोचरो भवति। तथैव परमात्मा एकोऽपि सन् सर्वजीवेषु व्याप्तः अनेकरूपेण प्रतिभाति। अज्ञानी तु सूर्याः अनेके सन्तीति भ्रमति तथैव जीवा अपि भिन्ना इति भावयन्ति। मरुत्तत्त्वं परिशीलयामश्चेत् मरुत् सप्तधा सप्तमार्गेषु चलति। सप्त, मरुद्रूपा एव। सर्वत्र मरुत्तत्त्वं व्याप्तम्। एवं पञ्चभूतात्मकप्रकृतौ परब्रह्म कथं व्याप्तमित्यस्यैका कथा 6छान्दोग्योपनिषदि विद्यते। उद्दालकः एकदा स्वकुमारं प्रति सद्वस्तु कथमेतत् जगति व्याप्तमिति कथयन् एवं विवृणोति प्रत्यक्षं यद्विद्यते तत्क्षणे एव नश्यति। तादृशस्य वस्तुनः ज्ञानाय कतिचन पद्धतयस्सन्ति वस्तु अदृष्टश्चेत् नास्तीति कथयितुं न शक्नुमः। तत्पूर्वं कीदृशमासीत् अद्य तथैव भवितुमर्हतीति एतत्स्थितिरेव परब्रह्मणः स्थितिरपि। उद्दालकः स्वकुमारं लवणमानयेति कथयति। जलपात्रे तन्निवेशय इति कथयित्वा परस्मिन् दिने तज्जलमानयित्वा लवणं कुत्रास्ति इति पृच्छति। भवानेव तज्जले निक्षिप्तवान् किल तद्देहीत्यपृच्छत्। तदा स कुमारः तन्नास्तीति कथयति। तज्जलं पानं कुर्वीति तं प्रति उद्दालकः कथयति। कुमारः तन्नीत्वा एतज्जलं लवणमयमिति कथयति। तदा पिता लवणं नास्तीति कथनं नोचितं खलु। तद्रूपं जले नष्टं परन्तु जलं लवणमयमभूत्। चक्षुषा तन्न दृष्टं भवति। एवमेव सर्वत्र व्याप्तं परब्रह्मरूप सद्वस्तुविचारणेन प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्मेति ज्ञानम् उद्भवति। तदा सर्वं ब्रह्ममयं, सर्वं खल्विदं ब्रह्म इत्यनुभूतिरुदेति। सैव पारलौकिका विद्या। अनेन ज्ञानेन जीवः इहजन्मन्येव मुक्तो भूत्वा जननमरणरूपसंसारचक्रे बद्धो न भवति। अतः पूर्वोक्तेषु धनेषु आत्मविद्या धनमेव प्रधानमिति वक्तुं शक्यते।

## संधर्व सूची

1. भसुभाषितत्रिशती
2. सुभाषितत्रिशती
3. रघुवंशः
4. श्रीमहाभारतम्
5. भगवद्गीता
6. छान्दोग्योपनिषत्
7. सुभाषितत्रिशती – भर्तृहरिः
8. भक्तिमाला – कुप्पा वेङ्कटकृष्णमूर्ती – May 2009 आध्यात्मिकमासपत्रिका


9. छान्दोग्योपनिषत् – गीताप्रेस, गोरखपुर
10. चम्पूरामायणम् – भोजः – चौखम्बा संस्कृतसंस्थान, वाराणसी – 1982
11. भगवद्गीता – ज्ञानयोगः – गीताप्रेस, गोरखपुर – 2011
12. रघुवंशः – कालिदासः – वाविल्लप्रेस् – मद्रास् – 1966
13. श्रीमहाभारतम् – व्यासः – गीताप्रेस् – गोरखपुर
14. भक्तिमाला – भक्तिमालाट्रस्ट् – मैसूर.